Digitization by eGangotri-South Center

'मास्टर'मणिमाला सीरीज़ नं० १७५ (कथाविभाग संख्या ६)

[श्री चित्रगुप्त यमद्वितीया व्रतकथा सहित]

श्री चित्रगुप्त पूजन विधि

18.3 CM

सङ्कलयिता—

श्री ज्ञानचन्द्र

देवनागरी

भूमिका लेखक—

डाक्टर सर ज्वालाप्रसाद श्रीवास्तव

के. वी. ई., डी. लिट्., डी. एस् सी.,

खाद्य सदस्य, भारत सरकार

प्रकाशक—

मास्टर खेलाड़ीलाल ऐण्ड सन्स

संस्कृत बुकडिपो,

कचौड़ी गली, काशी

प्रथम संस्करण] सन् १९४४ ई० [मूल्य ।=)

[पुनर्मुद्रणादि सर्वाधिकार सुरक्षित]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकाशकः—
जे० एन० यादव, प्रोप्राइटर,
मास्टर खेलाड़ीलाल ऐण्ड सन्स,
संस्कृत बुकडिपो,
कचौड़ी गली, बनारस सिटी।

E.81
M.3

मुद्रकः—
मास्टर प्रिण्टिङ्ग वर्क्स,
बुलानाला, बनारस।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

* श्रीगणेशाय नमः *

* श्री चित्रगुप्त पूजनविधि *

[चैत्र शुक्ल द्वितीया के दिन प्रातःकाल उठ कर, शौचादि तथा स्नानादि से निवृत्त होकर कलम, दावात इत्यादि साफ़ करके पूजन प्रारम्भ करे।]

शिखा बन्धन—

उर्ध्वकेशि ! विरूपाक्षि ! मांसशोणितभोजने !।
तिष्ठ देवि ! शिखाबन्धे चामुण्डे ! चापराजिते ! ॥

पवित्री करण—

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

आचमन—

ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः ।
[इन से तीन बार आचमन करे।]

हस्त प्रक्षालन—

ॐ गोविन्दाय नमः ।

प्राणायाम—

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्
ॐ तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।
[इस से तीन बार प्राणायाम करे।]

मार्जन—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रक्षा–

स्वस्तिवाचन—

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १ ॥
ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ २ ॥
ॐ शन्न इन्द्राग्नि भवता मवोभिः शन्न इन्द्र पूषणा वाजसा तौ ।
शमिन्द्रा सामा सुविताय शंयोः शमिन्द्रा पूषणा वाजसा तौ ॥ ३ ॥
ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥४॥
ॐ द्यौः शान्तिः अन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ५ ॥

करोतु स्वस्ति ते ब्रह्मा स्वस्ति वाऽपि द्विजायतः ।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥ १ ॥
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥ २ ॥
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ।
स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति सर्वदा ॥ ३ ॥
स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा ।
लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ! ॥ ४ ॥
असितो देवलश्चैव विश्वामित्रस्तथाऽङ्गिराः ।
स्वस्ति तेऽद्य प्रयच्छन्तु कार्त्तिकेयश्च षण्मुखः ॥ ५ ॥
विवस्वान् भगवान् स्वस्ति करोतु तव सर्वशः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः ॥ ६ ॥
अधस्ताद्धरणीं योऽसौ नागो धारयते सदा।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥ ७ ॥

सङ्कल्प—

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतिमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्ते पुण्यक्षेत्रे बौद्धावतारे वर्तमाने अमुकनामसम्वत्सरे दक्षिणायने कार्त्तिकमासे शुक्लपक्षे द्वितीयायां तिथौ अमुकवासरे अमुकनक्षत्रे अमुक-राशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये शुभपुण्यतिथौ अमुकगोत्रोत्पन्न अमुकवर्माऽहं सर्वपापक्षयपूर्वक-दीर्घायुर्विपुलधन-पुत्र-पौत्राद्यनवच्छिन्न-सन्तति-वृद्धि-स्थिरलक्ष्मी-कीर्तिलाभ-शत्रुपराजय—लेखनकलाकुशलाशीर्वाद-प्राप्त्यर्थं सदभीष्टसिद्ध्यर्थं व्यवहारे व्यवसाये वा सकलार्थसिद्धये यथा-शक्तिसम्पादितसामग्र्या मसिपात्रादीनां तथा श्रीचित्रगुप्तदेवताप्रीतये यथोपचारेण पूजनं कथाश्रवणं तथा तन्निर्विघ्नतासिद्धये गणपतिपूजनं कलशस्थापनं नवग्रहपूजनं च करिष्ये [करिष्यामि]।

❀ श्रीगणपतिपूजनम् ❀

[सोपारी में रक्षा लपेटकर गणेश जी का स्थापन एक दोने या सिकोरे में करे।]

ध्यान—

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुराऽसुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ २ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ ३ ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ४ ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ५ ॥

आवाहन—

आवाहयेत्तं गणराजदेवं रक्तोत्पलाभासमशेषबन्धनम् ।
विघ्नान्तकं विघ्नहरं गणेशं भजामि रौद्रं सहितं च सिद्धम् ॥

ॐ श्रीगणेशाय नमः, आवाहयामि, स्थापयामि तथा सर्वोपचारार्थे गन्धाऽक्षत-पुष्पाणि समर्पयामि, नमस्करोमि ।

❀ गौरीपूजनम् ❀

ध्यान—

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ।

श्रीगौर्य्यै नमः, आवाहयामि, सर्वोपचारार्थे गन्धाऽक्षत-पुष्पाणि समर्पयामि, नमस्करोमि ।

❀ कलशस्थापनम् ❀

भूमिपूजन—

भूमिम् आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

भूमिस्पर्शन—

पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ।
कलशाधारभूतं हि पवित्रं कुरु चासनम् ॥

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तधान्यस्थापन—

यवोऽसि धान्यराजोऽसि सर्वोत्पत्तिकरः शुभः ।
प्राणिनां जीवनोपायः कलशाऽघः क्षिपाम्यहम् ॥

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ।

कलशस्थापन—

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वतो पुनर्म्मा ऽऽविशताद्रयिः ।

कलश में जल—

गङ्गे च यमुने चैव गोदावरि सरस्वति ! ।
नर्मदे सिन्धु कावेरि ! कुम्भेऽस्मिन् सन्निधिं कुरु ॥

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतुसदनमसि वरुणस्य ऋतुसदनमासीद ।

गन्ध—

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।

सर्वौषधि—

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ।
मनैनु बभ्रूणामहꣳ शतं धामानि सप्त च ।

दुर्वा—

ॐ काण्डात्काण्डात्प्ररोहन्तो परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चपल्लव—

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।

सप्तमृत्तिका—

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथाः ।

पूगीफल—

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ।

पञ्चरत्न—

ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ।

स्वर्ण—

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

वस्त्र—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥

पूर्णपात्र—

ॐपूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो । धान्यपूर्णमिदं पात्रं स्थापयामि ॥

श्रीफल—

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥

इति पूर्णपात्रं निधाय श्रीफलं धृत्वा पुष्पमालादिभिः सुशोभयामि ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वरुणावाहन—

मकरस्थं पाशहस्तं शुभ्रवर्णं किरीटिनम्।
आवाहये प्रतीचीशं वरुणं जलनायकम्॥

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः॥

अस्मिन् कलशे वरुणं साङ्गं स-परिवारं सायुधं सशक्तिकमावाहयामि। ॐ भूर्भुवः स्वः भो वरुण! इहागच्छ इह तिष्ठ स्थापयामि पूजयामि।

देवावाहन—

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥

पूजा—

श्रीवरुणाय नमः, सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि।

कलशप्रार्थना—

देवदानवसम्वादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि यदा कुम्भ! विधृतो विष्णुना स्वयम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्राः विश्वेदेवाः सपैतृका ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ! ॥
सान्निध्यं कुरु मे देव ! प्रसन्नो भव सर्वदा ॥
प्रसन्नो भव । वरदो भव ।

❀ नवग्रहपूजनम् ❀

आवाहन—

[एक दीये में एक सोपारी रक्षा में लपेट कर रखकर नवग्रहों का आवाहन करे । या सूर्य मण्डल के मध्य में गोलाकार लाल, चन्द्र अग्निकोण में अर्ध चन्द्र सफेद, मङ्गल दक्षिण में त्रिकोण लाल, बुध ईशान में धनुष हरा, बृहस्पति उत्तर में पीला अष्टदल; शुक्र पूर्व में चतुष्कोण सफेद; शनि पश्चिम में काला मनुष्य, राहु नैऋत्य में काला मकर, केतु वायव्य में काली ध्वजा के रूप में स्थापित करे ।]

दिवाकरं सहस्रांशुं सुराऽसुरनमस्कृतम् ।
लोकनाथं विश्वनेत्रं सूर्यमावाहयाम्यहम् ॥
ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
ॐ भूर्भुवः स्वः सूर्य इहागच्छ इह तिष्ठ सूर्याय नमः ।
हिमरश्मिं निशानाथं क्षीरसागरसम्भवम् ।
औषधीनां तु राजानं सोममावाहयाम्यहम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

ॐ भूर्भुवः स्वः चन्द्र इहागच्छ इह तिष्ठ सोमाय नमः ॥

धरणीगर्भसम्भूतं लोहिताङ्गं सुवर्चसम् ।
कुमारं क्रूरकर्माणं भौममावाहयाम्यहम् ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ।

ॐ भूर्भुवः स्वः भौम इहागच्छ इह तिष्ठ भौमाय नमः ।

बुधं बुद्धि–प्रदातारं सोमवंशविवर्धनम् ।
यजमानहितार्थाय बुधमावाहयाम्यहम् ॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च । अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ।

ॐ भूर्भुवः स्वः बुध इहागच्छ इह तिष्ठ बुधाय नमः ।

बुद्धिश्रेष्ठो गिरः पुत्रो देवानां या गुरुः स्मृतः ।
तमिन्द्रमन्त्रिणं भक्त्या गुरुमावाहयाम्यहम् ॥

ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।

ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इह तिष्ठ बृहस्पतये नमः ।

प्रविष्टो जठरं शम्भोर्निसृतः पुनरेव यः ।
तं सुरगुरुं भक्त्या शुक्रमावाहयाम्यहम् ॥

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ भूर्भुवः स्वः शुक्र इहागच्छ इह तिष्ठ शुक्राय नमः ॥

धर्मराजानुजं देवं भिन्नाञ्जनसमुद्भवम् ।
छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ।

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इह तिष्ठ शनैश्चराय नमः ।

चक्रेण च्छिन्नमूर्धानं विष्णुना च निरीक्षितम् ।
सैंहिकेयं महाकायं राहुमावाहयाम्यहम् ॥

ॐ कयो नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।

ॐ भूर्भुवः स्वः राहो इहागच्छ इह तिष्ठ राहवे नमः ॥

अञ्जनाभं महारौद्रं बहुरूपं महाग्रहम् ।
क्रूरकर्म महाकायं केतुमावाहयाम्यहम् ॥

ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे । समुषद्भिरजायथाः ॥

ॐ भूर्भुवः केतो इहागच्छ इह तिष्ठ केतवे नमः ॥

ॐ सूर्यादिनवग्रहेभ्यो नमः ।

पूजा—

ॐ सूर्यादिनवग्रहेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

प्रार्थना—

ब्रह्मा मुरारिस्त्रिपुरान्तकारिर्भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

❀ रक्षाविधानम् ❀

वशिष्ठं मुनिशार्दूलं विश्वामित्रं तथैव च ।
व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ॥ १ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्याधिका ये मुनयस्त्वाचार्याश्च तपोधनाः ।
तान् सर्वान् प्रणमाम्यद्य यज्ञरक्षाकराः सदा ॥ २ ॥
पूर्वे रक्षतु गोविन्द आग्नेयां गरुडध्वजः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैऋते ॥ ३ ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदीशाने तु गदाधरः ॥ ४ ॥
उर्द्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः ।
एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ॥ ५ ॥

❀ श्रीचित्रगुप्तपूजनम् ❀

ध्यान—

चित्रगुप्त ! समागच्छ धर्मराजस्य मन्त्रकृत् ! ।
मम विघ्नविनाशाय चित्रगुप्त ! नमोऽस्तु ते ॥

ॐ सचित्रचित्रं चितयन्तमस्मे चित्रक्षत्रं चित्रतमं वायोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहद्वं चन्द्र चन्द्राभिर्गृणते पुवस्व ॥

आवाहन—

आगच्छ भगवन् देव ! स्थाने चाऽत्र स्थिरो भव ।
यावत् पूजां करिष्यामि तावत्त्वं सन्निधो भव ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

उदीच्यवेषधरं सौम्यदर्शनं लेखनीपत्रोपेतं द्विभुजं केतुप्रत्यधिदेवं चित्रगुप्तमावाहयामि, श्रीचित्रगुप्ताय नमः, आवाहयामि, स्थापयामि पूजयामि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिष्ठा—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यैः प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

आसन—

रम्यं सुशोभनं दिव्यं, आसनं चापि निर्मलम्।
चित्रगुप्त! गृहाणेदं पावनं सुखदं सदा॥

ॐ पुरुष ऽएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्ने नाति रोहति।

श्रीचित्रगुप्ताय नमः, आसनम् समर्पयामि।

पाद्यम्—

उष्णोदकं निर्मलं च सर्वसौभाग्यसंयुतम्।
पादप्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम्॥

ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।

श्रीचित्रगुप्ताय नमः, पाद्यं समर्पयामि।

अर्घ्यम्—

दूर्वा-चन्दन-पुष्पं च तीर्थतोयाभिमन्त्रितम्।
अर्घ्यं चैव मया दत्तं चित्रगुप्त! नमोऽस्तु ते॥

ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ् व्यक्रामत् साशनानशने ऽअभि॥

श्रीचित्रगुप्ताय नमः, अर्घ्यं समर्पयामि।

आचमन—

सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम्।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर!॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ ततो विराडजायत विराजो ऽअधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः। श्रीचित्रगुप्ताय नमः, आचमनीयं समर्पयामि॥

हस्तप्रक्षालन—

गन्धतोयं समानीतं सुवर्णकलशे स्थितम्।
हस्तप्रक्षालनार्थाय पानीयं ते निवेदये॥
श्रीचित्रगुप्ताय नमः, हस्तप्रक्षालनार्थे जलं समर्पयामि।

पयःस्नान—

कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पये॥

ॐ पयः पृथिव्यां पय ऽओषधीषुं पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।

श्रीचित्रगुप्ताय नमः, पयःस्नानं समर्पयामि। पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि॥

दधि स्नान—

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

ॐ दधिक्राव्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्र ण ऽआयूꣳषि तारिषत्।

श्रीचित्रगुप्ताय नमः, दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घृतस्नान—

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।

श्रीचित्रगुप्ताय नमः, घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धादकस्नानान्ते आचमनीयं समर्पयामि । हस्तप्रक्षालनार्थे जलं समर्पयामि ।

मधुस्नान—

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ मधु वाता ऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ ऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।

श्रीचित्रगुप्ताय नमः मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि । मधुस्नानान्ते आचमनीयं समर्पयामि । हस्तप्रक्षालनार्थे जलं समपयामि ।

शर्करा स्नान—

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

ॐ अपाꣳरसमुद्वयꣳसूर्ये सन्तꣳसमाहितम् । अपाꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीचित्रगुप्ताय नमः, शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि।

शुद्धोदक स्नान—

कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती।
गंगा च यमुना तोयं मया स्नानार्थमर्पितम्॥

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

श्रीचित्रगुप्ताय नमः, पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि।

उद्वर्त्तन स्नान—

नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्।
उद्वर्त्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम्॥

ॐ अꣳशुना ते अꣳशुः पृच्यतां परुषा परुः। गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः।

श्रीचित्रगुप्ताय नमः, उद्वर्त्तनस्नानं समर्पयामि। तत्पश्चात् शुद्धोदकस्नानम्, आचमनीयम्, हस्तप्रक्षालनार्थे जलम् समर्पयामि।

षष्ठ गन्धोदक स्नान—

मलयाचलसमुद्भूतं चन्दनागरुसम्भवम्।
चन्दनं देवदेवेश! स्नानार्थं प्रतिगृह्यताम्॥

श्रीचित्रगुप्ताय नमः, षष्ठगन्धोदकस्नानं समर्पयामि। तत्पश्चात् शुद्धोदकस्नानम्, आचमनीयं हस्तप्रेक्षालनार्थे जलं समर्पयामि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्नान—

गंगा-पयस्वती-रेवा-पयोष्णी-नर्मदा-जलैः ।
स्नापितोऽसि मया देव ! तथा शान्तिं कुरुष्व मे ॥

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।

श्रीचित्रगुप्ताय नमः पञ्चामृतादिस्नानान्ते सर्वाङ्गशुद्धोदकस्नानं समर्पयामि ।

आचमन—

पुनराचमनीयं ते आस्य-शुद्धिकरं परम् ।
दन्तसम्मार्जनं सम्यक्, जलं शुद्धं गृहाण मे ॥

श्रीचित्रगुप्ताय नमः, आचमनीयं समर्पयामि । हस्तप्रक्षालनार्थे जलं समर्पयामि ।

वस्त्र—

आरक्तयुगलं वस्त्रं युगधर्मप्रवर्तकम् ।
आच्छादनं गृहाणेदं, चित्रगुप्त ! नमोऽस्तु ते ॥

ॐ तस्माद्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।

श्रीचित्रगुप्ताय नमः, वस्त्रं समर्पयामि । आचमनं समर्पयामि । हस्त-प्रक्षालयामि ।

यज्ञोपवीत—

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं चोत्तरीयं गृहाण परमेश्वर ! ॥

ॐ तस्मादश्वा ऽअजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ॥ श्रीचित्रगुप्ताय नमः, यज्ञोपवीतं समर्पयामि ।

CC-0. In Public Domain: Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गन्ध—

गन्धाढ्यं शोभनं दिव्यं, सुकुङ्कुमरोचनान्वितम्।
मया निवेदितं भक्त्या चन्दनं प्रतिगृह्यताम्॥

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा ऽअयजन्त साध्या ऋषयश्च ये॥ श्रीचित्रगुप्ताय नमः, गन्धं समर्पयामि।

अक्षत—

अक्षताश्च सुरश्रेष्ठ! कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर!॥

ॐ अक्षन्नमीमदन्त ह्यव प्रिया ऽअधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥
श्रीचित्रगुप्ताय नमः, अक्षतान् समर्पयामि।

माला—

माल्यादीनि सुगन्धीनि, मालत्यादीनि वै प्रभो!।
मयाऽऽनीतानि पुष्पाणि गृहाण परमेश्वर!॥

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्याऽऽसीत्किं बाहू किमुरू पादा उच्येते॥
श्रीचित्रगुप्ताय नमः, मालां समर्पयामि।

पुष्प—

इदं पुष्पं गृहाण त्वं, सुगन्धं सुमनोहरम्।
ब्रह्मकायसमुद्भूतं चित्रगुप्त! नमोऽस्तु ते॥
पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः।
पूजनार्थं नीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम्॥
श्रीचित्रगुप्ताय नमः, पुष्पं समर्पयामि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धूप—

धूपं गुग्गुलसंयुक्तं गन्धाढ्यं घृतपूरितम् ।
आघ्रेयं सर्वदेवानां चित्रगुप्त ! नमोऽस्तु ते ॥
ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥
श्रीचित्रगुप्ताय नमः, धूपं समर्पयामि ।

दीप—

साऽऽज्यञ्च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ॥
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
श्रीचित्रगुप्ताय नमः, दीपं समर्पयामि ।

नैवेद्य—

अन्नं बहुगुणं स्वादु, षड्रसैश्च समन्वितम् ।
पक्वान्नं मधुना युक्तं नैवेद्यं प्रतिगृह्यताम् ॥
ॐ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २॥ अकल्पयन् ॥
श्रीचित्रगुप्ताय नमः, नैवेद्यं समर्पयामि ।

आचमनीय—

एलो–शीर–लवङ्गादि–कर्पूर–परिवासितम् ।
प्राशनार्थं कृतं तोयं गृहाण परमेश्वर ! ॥
श्रीचित्रगुप्ताय नमः, आचमनीयं समर्पयामि । हस्तप्रक्षालनार्थे जलं समर्पयामि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ताम्बूल—

मुखवासकरं दिव्यं ताम्बूलञ्च सुवासितम् ।
लवङ्गकर्पूरयुतं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
श्रीचित्रगुप्ताय नमः, ताम्बूलं समर्पयामि ।

फल—

इदं फलं मया देव ! स्थापितं पुरतस्तव ।
तेन मे सफला वाप्तिर्भवेज्जन्मनि जन्मनि ॥
ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥
श्रीचित्रगुप्ताय नमः, फलं समर्पयामि ।

❀ लेखनी-मसिभाजन-पूजनम् ❀

[कलमों तथा दावातों में रक्षा लपेट कर ध्यान करे]

लेखनीध्यान—

कृष्णानने ! द्विजिह्वे ! च चित्रगुप्तकरस्थिते ! ।
सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥

मसिभाजनध्यान—

मसि ! त्वं लेखनीयुक्तं चित्रगुप्ताशयस्थिते ।
सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥

पूजा—

सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, नमस्करोमि ।

प्रार्थना—

कृष्णानने ! कृष्णजिह्वे ! चित्रगुप्ताशयस्थिते ।
प्रार्थनेयं गृहाण त्वं सदैव वरदा भव ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मसिभाजनसमर्पण—

म्रियते चित्रगुप्तेन सदारस्त्वं महात्मना ।
दक्षपार्श्वे सदा तिष्ठ, लेखिन्या सहितो मम ॥
श्रीचित्रगुप्ताय नमः, लेखनीं, मसिभाजनं समर्पयामि ॥

दक्षिणा—

हिरण्यगर्भगर्भस्थं, हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः, शान्तिं प्रयच्छ मे ॥
ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
श्रीचित्रगुप्ताय नमः, दक्षिणां समर्पयामि ।

कर्पूरार्तिक्य—

कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥
ॐ इदꣳ हविः प्रजननं मे ऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजां बहुलां मे
करोत्वन्नं पयो रेतो ऽअस्मासु धत्त ॥
श्रीचित्रगुप्ताय नमः, कर्पूरार्तिक्यं प्रदर्शयामि ।

प्रणाम—

कायस्थानां पते ! देव ! सर्वप्राणिहृदि स्थित ! ।
ब्रह्मकायसमुद्भूत ! चित्रगुप्त ! नमोऽस्तु ते ॥
चित्रगुप्त ! समागच्छ धर्मराजान्तिकादिह ।
लेखनीकटनीहस्त ! चित्रगुप्त ! नमोऽस्तु ते ॥
नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रदक्षिणा—

यानि कानि च पापानि, जन्मान्तरकृतानि वै ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुम् ॥

पुष्पाञ्जलि—

नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं, गृहाण परमेश्वर ! ॥
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ।
त्राहि मां सर्वदा देव ! सर्वपापहरो भव ॥
चित्रगुप्त ! नमस्तुभ्यं लेखकाध्यक्षनायक ! ।
कायस्थजातिमासाद्य, कुरु वंशविवर्द्धनम् ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

श्रीचित्रगुप्ताय नमः, पुष्पाञ्जलियुक्तं नमस्कारं समर्पयामि ।

विशेषार्घ्य—

चित्राय चित्रगुप्ताय जगच्चित्रकराय च ।
विश्वस्याऽरिष्टनाशाय चित्रगुप्त ! नमोऽस्तु ते ॥
चित्रगुप्तः कलिः कालौ ग्रहा वै मृत्युरेव च ।
यमश्च भगवान् साक्षात् पूजयामि महीप्रदम् ॥

अनेन मन्त्रेण पूगीफल-हिरण्य-गन्धाक्षत-पुष्पैः संयुक्तजलेन अर्घमेकं दद्यात् ।

श्रीचित्रगुप्ताय नमः, अनेन सफलार्घ्येण फलदोऽस्तु सदा मम ।
विशेषार्घ्यं समर्पयामि ।

श्रीचित्रगुप्तपूजनविधिः समाप्तः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीचित्रगुप्त यमद्वितीया व्रतकथा

श्रीभीष्म उवाच—

कायस्था इति यल्लोके ख्याताश्चैव महामुने ! ।
कस्य वंशसमुद्भूताः कस्मिन् वर्णे च कथ्यते ॥ १ ॥

श्री भीष्मजी बोले हे महामुने ! इस लोक में कायस्थ नाम से विख्यात जो पुरुष हैं वे किसके वंश में उत्पन्न हैं ? और किस वर्ण में कहे जाते हैं ? ॥१॥

तमहं श्रोतुमिच्छामि कथ्यतां भो महामुने ! ।
एतन्मे संशयं ब्रह्मन् ! छेत्तुमर्हस्यशेषतः ॥ २ ॥

हे महामुने ! यह कथा सुनने की मेरी इच्छा है । इस सन्देह को दूर करने को आप सब भाँति समर्थ हैं । इसलिए आप कृपा करके इस पुनीत कथा को वर्णन कीजिए ॥२॥

इति पृष्टो मुनिः प्राह गाङ्गेयं शुचिविग्रहम् ।
पुलस्त्य उवाच—शृणु गाङ्गेय ! वक्ष्यामि कायस्थोत्पत्तिकारकम् ॥ ३ ॥

इस भाँति से पूछे गए मुनि पुलस्त्यजी प्रसन्न मन होकर बोले, हे गाङ्गेय ! कायस्थोत्पत्ति मैं आप से वर्णन करता हूँ, सुनो ॥३॥

न श्रुतं यत्त्वया पूर्वं तन्मे निगदतः शृणु ।
येनेदं सकलं विश्वं स्थावरं जङ्गमादिकम् ॥ ४ ॥
उत्पाद्य पाल्यते भूयो निधनाय प्रकल्प्यते ।
अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः ॥ ५ ॥
यथाऽसृजत् पुरा विश्वं कथयामि च तं प्रभो ! ।
मुखतो ब्राह्मणा जाता बाहूभ्यां क्षत्रियास्तथा ॥ ६ ॥
उरुभ्यां च तथा वैश्याः पद्भ्यां शूद्राः समुद्भवाः ।
द्वि-चतुः-षट्पदादिश्च सर्वजीवान् सरीसृपान् ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एककालेऽसृजद् ब्रह्मा चन्द्र-सूर्य-ग्रहास्तथा।
एवं बहुविधं तत्र विश्वमुत्पाद्य भारत! ॥ ८ ॥
सुतं ज्येष्ठं समाहूय सूर्यप्रमिततेजसम्।
प्रतिपालय यत्नेन जगत् सर्वञ्च सुव्रत! ॥ ९ ॥

जिसको आपने अद्यावधि नहीं सुना, उसको कहता हूँ। जिसने इस चराचरात्मज जगत् की ॥४॥ उत्पन्न करके पालन किया और करता है फिर वही नाश करेगा। एतादृश अव्यक्त और शान्त पुरुष लोक पितामह ब्रह्मा ने ॥५॥ जिस भाँति पूर्व ही इस संसार की कल्पना की है वही कहता हूँ। मुख से ब्राह्मण, बाहु से क्षत्रिय, ॥६॥ जंघा से वैश्य, पैर से शूद्र। इसी प्रकार दो चार छः पावों वाले आदि से लेकर समस्त सर्पादि जीवों को ॥७॥ एक ही काल में चन्द्र सूर्यादि ग्रहों को और अन्यान्य बहुत जीवों को उत्पन्न करके हे भारत! ब्रह्मा ने ॥८॥ सूर्य सम तेजधारी ज्येष्ठ पुत्र को बुलाकर कहा—'हे सुव्रत! यत्नपूर्वक इस जगत् की रक्षा करो' ॥९॥

इत्याज्ञाप्य सुतं ज्येष्ठं सृष्टिपालनहेतुकम्।
ततस्तु ब्रह्मणा तेन यत्कृतं तन्निशामय ॥ १० ॥

सृष्टि पालन हेतु ज्येष्ठ पुत्र को आज्ञा देकर जो ब्रह्मा ने किया उसे आप सुनिये ॥१०॥

दशवर्षसहस्राणि, दशवर्षशतानि च।
समाधिमगमद् ब्रह्मा ततो विश्रान्तमानसः ॥ ११ ॥

एकाग्र चित्त होकर ब्रह्मा ने दशहजार दशसौ वर्ष समाधि लगायी, अन्त में विश्रान्त चित्त हुए ॥११॥

ततः समाहितं यावद् अद्भुतं तद्वदामि ते।
तच्छरीरान्महाबाहुः श्यामः कमललोचनः ॥ १२ ॥
कम्बुग्रीवो व्यूढशीर्षः पूर्णचन्द्रनिभाननः।
लेखनीकटनीहस्तो मसीभाजनसंयुतः ॥ १३ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेजस्वी पुरुषो धीमान् ब्रह्मणोऽव्यक्तजन्मनः ।
उत्पन्नस्तु विचित्राङ्गो ध्यानस्तिमितलोचनः ॥१४॥

जब ब्रह्मा विश्रान्तचित्त हुए तब जो हुआ सो आपसे कहता हूँ । उन ब्रह्मा के शरीर से बड़े २ भुजाओं वाले, श्यामवर्ण, कमलवत् नेत्र, ॥१२॥ शंख के तुल्य गर्दन, चन्द्रवत् मुख, तेजस्वी, अति बुद्धिमान्, हाथ में कलम और दावात लिए, ॥१३॥ तेजस्वी, बुद्धिमान्, अति सुन्दर, विचित्रांग, स्थिर नेत्र वाले, एक पुरुष अव्यक्त-जन्मा ब्रह्मा के शरीर से उत्पन्न हुए ॥१४॥

त्यक्त्वा समाधिं गाङ्गेय ! तं ददर्श पितामहः ।
अधोर्ध्वञ्च निरीक्ष्येमं पुरुषं चाऽग्रतः स्थितम् ॥१५॥
प्रपच्छ को भवानग्रे ? स्थितो वै पुरुषोत्तमम् ।
इति पृष्टोऽब्रवीद्वाक्यं ब्रह्माणं कमलोद्भवम् ॥१६॥

हे गाङ्गेय ! ब्रह्माजी समाधि को छोड़कर सामने स्थित पुरुष को नीचे ऊपर देखकर ॥१५॥ ब्रह्मा ने पूछा कि हे पुरुषोत्तम ! आप हमारे सामने स्थित कौन हैं ? ब्रह्मा का यह प्रश्न सुनकर वह पुरुष बोला— ॥१६॥

उत्पन्नोऽहं विधे ! नाथ ! त्वच्छरीरान्न संशयः ।
नामधेयं च मे तात ! कर्त्तुमर्हस्यशेषतः ॥१७॥

हे नाथ ! हे विधि ! मैं आप ही के शरीर से उत्पन्न हुआ हूँ । इसमें कुछ भी सन्देह नहीं । अब आप मेरा हे तात ! नामकरण करने योग्य हैं सो करिये और मेरे करने योग्य कार्य भी कहिए ॥१७॥

यथोचितं भवत्कार्यं तत् त्वं मामनुशासय ।
इत्याकर्ण्य ततो ब्रह्मा पुरुषं तं शरीरजम् ॥१८॥
प्रहस्य प्रत्युवाचैनमाऽऽनन्दितमनास्ततः ॥१९½॥

यह बात सुनकर ब्रह्मा जी निज शरीरज पुरुष से प्रसन्न मन हो, हँस कर बोले कि— ॥ १८–१९½ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मोवाच—

मच्छरीरात् समुद्भूतस्तस्मात् 'कायस्थ'संज्ञकः।
'चित्रगुप्ते'ति नाम्ना तु ख्यातो भुवि भविष्यति ॥२०॥

ब्रह्मा जी ने कहा कि मेरे शरीर से आप उत्पन्न हुए हो इससे तुम्हारी 'कायस्थ' संज्ञा और चित्रगुप्त तुम्हारा नाम पृथिवी पर विख्यात होगा ॥ २० ॥

धर्माऽधर्मविवेकार्थं धर्मराजपुरे शुभे।
भविष्यति च भो वत्स! निवासः सुविनिश्चितम् ॥२१॥

और हे वत्स! धर्मराज के पुर में धर्माधर्म के निर्णय के लिये तुम्हारा निश्चल निवास होगा ॥ २१ ॥

निजवर्णोचितं धर्मं पालनीयं यथाविधि।
प्रजाः सृजस्व भो पुत्र! इति भारसमन्वितम् ॥२२॥

हे पुत्र! अपने वर्ण में जो उचित धर्म है उसको विधि पूर्वक पालन करो और प्रजा को उत्पन्न करो ॥ २२ ॥

तस्मै दत्वा वरं ब्रह्मा तत्रैवाऽन्तरधीयत ॥२३½॥

इस प्रकार ब्रह्मा जी भार्युक्त वर को देकर आप अन्तर्ध्यान हो गए ॥२३½॥

पुलस्त्य उवाच—

चित्रगुप्तात् प्रजा जाता शृणु तां कथयामि ते।
शृणु तेषां च नामानि कुरुवंशविवर्धन! ॥२४॥

श्री पुलस्त्यजी ने कहा कि हे कुरुवंश के वृद्धिकर्ता भीष्म! चित्रगुप्त से जो प्रजा उत्पन्न हुई उनके नाम वर्णन करता हूँ, सुनिये ॥ २४ ॥

गौडाख्या माथुराश्चैव भटनागरसेनकाः।
अट्ठिगणाः श्रीवास्तव्याः अम्बष्ठाः करणास्तथा ॥२५॥
अपरे चाऽभवन् पुत्राश्चित्रगुप्तान्महामते!।
कुशलाः सर्वशास्त्रेषु ह्यम्बष्ठाद्याश्च सत्तमाः ॥२६॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गौड़, माथुर, भटनागर, सेनक, अहिगण, श्रीवास्तव्य, अम्बष्ठ, करण, ॥२५॥ हे महामते! और भी चित्रगुप्त से उत्पन्न अम्बष्ठादिक पुत्र सब समस्त शास्त्रों में निपुण उत्पन्न हुए ॥२६॥

पुत्रान् प्रस्थापयामास चित्रगुप्तो महीतले।
धर्माऽधर्मविचारज्ञश्चित्रगुप्तो महामतिः ॥२७॥
भूयस्तान् शिक्षयामास धर्मसाधनमुत्तमम्।
पूजनं देवतानां च पितृणां यज्ञसाधनम् ॥२८॥
भरणं ब्राह्मणानां च सर्वदाऽतिथिसेवनम् ॥२९½॥

तब चित्रगुप्त ने पुत्रों को पृथ्वी पर भेजा और धर्माधर्म के जानने वाले महामति चित्रगुप्त ने ॥२७॥ धर्मसाधन की शिक्षा दी कि देवताओं का पूजन, पितरों का श्राद्ध, तर्पण, ॥२८॥ ब्राह्मणों का पालन-पोषण और अभ्यागतों की सेवा यत्न पूर्वक सदैव करना ॥ २९½ ॥

कर्त्तव्यं हि प्रयत्नेन लोकत्रयहिताय वै।
हे पुत्राः! स्वर्गकामाय पूज्या महिषमर्दिनी ॥३०॥

हे पुत्र! तीनों लोकों के हित के लिए यत्न करना। और स्वर्ग की कामना करके महिषमर्दिनी देवी का पूजन अवश्य करना ॥ ३० ॥

या च माया प्रकृतिश्च चण्ड-मुण्डविनाशिनी।
तस्यास्तु पूजनं कार्यं सर्वसिद्धिप्रदायकम् ॥३१॥

जो माया प्रकृतिरूप और चण्ड मुण्ड के नाश करने वाली तथा समस्त सिद्धियों को देने वाली देवी हैं, उनका पूजन करना ॥ ३१ ॥

तस्या प्रभावतो देवाः सिद्धिं प्राप्य दिवङ्गताः।
स्वर्गाधिकारमासाद्य जाता यज्ञभुजः सदा ॥३२॥
भवद्भिः सा सुपूज्या तु मिष्टान्नैः सुमनोहरैः।
भवतां सिद्धिदा यस्मात् देवतानां च चण्डिका ॥३३॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जिसके प्रभाव से देवता लोग सिद्धियों को पाकर स्वर्गलोक को गए। और स्वर्ग के अधिकार को पाकर सदैव यज्ञ में भाग लेने वाले हुए ॥ ३२ ॥ उस देवी के अर्थ तुम सब लोग उत्तम मिष्ठान्नादि को समर्पण करो जिससे वह देवताओं की भाँति तुमको भी सिद्धि देने वाली हो ॥ ३३ ॥

वैष्णवं धर्ममाश्रित्य मद्वाक्यं प्रतिपालय।
अनुशास्य सुतानेवं चित्रगुप्तो दिवं ययौ ॥३४॥

वैष्णव धर्म का अवलम्बन करके मेरे वाक्य का प्रतिपालन करो। यह आज्ञा पुत्रों को चित्रगुप्त जी देकर आप स्वर्ग को चले गए ॥ ३४ ॥

धर्मराजाधिकारं च चित्रगुप्तः सदाऽवसत्।
एवं भीष्म ! समुत्पन्नाः कायस्था ये प्रकीर्तिताः ॥३५॥

चित्रगुप्त जी स्वर्ग में जाकर धर्मराज के अधिकार में सदैव स्थित हुए। हे भीष्म ! इस भाँति चित्रगुप्त की उत्पत्ति की व्यवस्था है। वह मैंने आपसे कही ॥३५॥

ये सृष्टास्ते समाख्याताः सम्वादं शृणु यत्परम् ॥३६॥
अहं ते कथयिष्यामि विचित्रमितिहासकम्।
प्रभावं चित्रगुप्तस्य समुद्भूतं यथा पुनः ॥३७॥

और मैं उन लोगों का विचित्र इतिहास ॥ ३६ ॥ और चित्रगुप्त का जैसा प्रभाव उत्पन्न हुआ सो भी कहता हूँ ॥ ३७ ॥

पुलस्त्य उवाच—

सौदासो नाम राजाऽभूत् समस्ते क्षितिमण्डले।
सदा पापरतः सोऽपि धर्माऽधर्मौ न विन्दति ॥३८॥

श्री पुलस्त्य बोले कि धर्माधर्म को न जानता हुआ नित्य पाप कर्म में रत पृथ्वी पर सौदास नामक राजा हुआ ॥ ३८ ॥

स यथा स्वर्गमासाद्य लब्धं पुण्यं फलं शृणु।
स हि पापो दुराचारो धर्मकार्यविवर्जितः ॥३९॥

वह पापी दुराचारी धर्म कर्म से रहित जिस प्रकार स्वर्ग में जाकर पुण्य के फल को भोग किया सो वह कथा सुनो ॥ ३९ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजनीतिगतं धर्मं न जानाति कथञ्चन।
स्वदेशे वादयामास पटहं स नराधिपः ॥४०॥

राजनीति को भी न जानता हुआ राजा ने निज राज्य में मुनादी पिटवा दिया ॥ ४० ॥

न दातव्यं न कर्तव्यं दैवं पैत्र्यं कथञ्चन।
आतिथ्यं जपकर्माणि तपःसाधनमुत्तमम् ॥४१॥
न कर्तव्यं नरैः क्वापि मत्पालितमहीतले ॥४२½॥

दान, धर्म, हवन श्राद्ध, तर्पण, अतिथियों के सत्कार, जप, नेम और तपस्या का साधन मेरे राज्य में कोई न करे ॥ ४१–४२½ ॥

वसन्ति ये तस्य चक्रे देव्यादिषु रता द्विजाः।
परित्यज्य स्वकं देशं नानादेशान्तरं गताः ॥४३॥
ये केचिन्न्यवसन् चक्रे चाऽन्ये वा ब्राह्मणादयः।
नैव यज्ञं प्रकुर्युस्ते दैवं पित्र्यं कदाचन ॥४४॥

देवी की भक्ति में तत्पर ब्राह्मण लोग उस सौदास राजा का नगर छोड़कर दूसरे-दूसरे देश में चले गये और जो ब्राह्मणादिक वहीं रह गए वे यज्ञ हवन श्राद्ध और तर्पण कभी नहीं करते थे ॥ ४३–४४ ॥

ततः प्रभृति गाङ्गेय! न यज्ञो हवनं क्वचित्।
न कोऽपि कुरुते भीष्म! पुण्यं तस्य बहिर्गतम् ॥४५॥

हे गांगेय! (गंगा जी के पुत्र भीष्म!) तब से उस राज्य में कोई कहीं पर यज्ञ हवनादि पुण्य कर्म नहीं करता था। हे भीष्म! उस देश से पुण्य बाहर चला गया ॥४५॥

ते द्विजाश्चान्यवर्णाश्च चक्रिरे धर्मविप्लवम्।
अहो! भूमिभृतस्तस्य शृणु कर्मविपाकजम् ॥४६॥

ब्राह्मण और अन्य धर्म के लोग धर्म को नाश करने लगे। अब उस दुष्ट राजा के कर्मविपाक को सुनो ॥ ४६ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कार्तिके शुक्लपक्षे तु द्वितीयायां शुभतिथौ ।
शुचिर्भूत्वा तु कायस्थाः चित्रगुप्तस्य पूजनम् ॥४७॥
चक्रिरे भक्तिभावेन धूपदीपादिकैः शुभैः ।
दैवात् पप्रच्छ कस्येदं पूजनं क्रियते शुभम् ॥४८॥

कार्तिक शुक्लपक्ष की द्वितीया उत्तम तिथि को पवित्र होकर कायस्थ लोग चित्रगुप्त का पूजन ॥४७॥ भक्तिभाव से परिपूर्ण सुन्दर धूप दीपादि से करते थे। दैववश सौदास राजा भी पृथ्वी पर घूमता हुआ वहाँ पहुँचा ॥ ४८ ॥

तेऽप्यूचुश्चित्रगुप्तस्य पूजां कुर्मः शुभां नृप ! ॥४९½॥

और पूजन देखकर पूछने लगा कि यह पूजन किसका करते हो ? वे लोग बोले कि—हे राजन् ! चित्रगुप्त की यह शुभ पूजा करते हैं ॥ ४९½ ॥

राजोवाच—

अहमप्याचरिष्यामि चित्रगुप्तस्य पूजनम् ।
ततश्च विधिवत् स्नानं कृत्वा चैव नराधिप ! ॥५०॥
श्रद्धायुक्तेन मनसा कृतवान् पूजनं ततः ।
करणात् पूजनं तस्य चित्रगुप्तस्य भक्तितः ॥५१॥
गतपापोऽभवत् सद्यः सौदासः स महीपतिः ।
चित्रगुप्तप्रसादेन सुरलोकं गतो नृपः ॥५२॥

यह सुन राजा ने कहा कि मैं भी चित्रगुप्त की पूजा करूँगा। यह कह विधि-युक्त स्नान करके ॥ ५० ॥ श्रद्धायुक्त मन से चित्रगुप्त की पूजा किया तो उस भक्ति युक्त पूजन करने से ॥ ५१ ॥ उसी क्षण पापरहित होकर वह सौदास राजा स्वर्ग लोक को गया ॥ ५२ ॥

इदं विचित्रमाख्यानं चित्रगुप्तप्रभावजम् ।
कथितं ते नृपश्रेष्ठ ! किमन्यच्छ्रोतुमिच्छसि ? ॥५३॥

यह विचित्र चित्रगुप्त के प्रभाव वाला इतिहास मैंने आप से कहा। अब हे नृपश्रेष्ठ ! तुम्हारी क्या सुनने की इच्छा है ॥ ५३ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्याकर्ण्य ततो भीष्मः प्रत्युवाच महामुनिम् ।

भीष्म उवाच—

विधिना केन विप्रेन्द्र ! पूजां तत्र चकार सः ॥५४॥

यह सुन कर भीष्म जी महर्षि पुलस्त्य जी से बोले कि हे विप्रेन्द्र ! किस विधि से वहाँ उसने पूजन किया ? ॥ ५४ ॥

को मन्त्रः को विधिस्तत्र तत्सर्वं कथय प्रभो ! ।

यमासाद्य मुनिश्रेष्ठ ! सौदासः स्वर्गमाप्नुयात् ॥५५॥

किस मंत्र, किस विधि के प्रभाव से, हे मुनिश्रेष्ठ ! हे प्रभो ! सौदास राजा स्वर्ग को गया ॥ ५५ ॥

पुलस्त्य उवाच—

चित्रगुप्तस्य पूजायां विधानं कथयामि ते ।

नैवेद्यैर्घृतपक्वैश्च तथा कालोद्भवैः फलैः ॥५६॥

गन्धपुष्पोपहारैश्च धूपदीपैस्तथोत्तमैः ।

नानाप्रकारनैवेद्यैः पट्टवस्त्रैः सुशोभनैः ॥५७॥

भेरी-शङ्ख-मृदङ्गैश्च नानावाद्यैर्डिमड्डिमैः ।

चित्रगुप्तस्य पूजां तु कुर्याद्भक्तिसमन्वितः ॥५८॥

श्री पुलस्त्य जी बोले कि हे भीष्म ! चित्रगुप्त के पूजन की विधि मैं आपसे कहता हूँ । घृत से बने नैवेद्य और ऋतु फल ॥ ५६ ॥ चन्दन, पुष्प, धूप, दीप, अनेक प्रकार के नैवेद्य और रेशमी वस्त्र से पूजन करके ॥ ५७ ॥ भेरी, शङ्ख, मृदङ्ग, डिमडिम और भी अनेक प्रकार के बाजे बजाकर भक्तियुक्त श्री चित्रगुप्त का पूजन करे ॥ ५८ ॥

कलशं नवमानीय वारिणा परिपूरितम् ।

शर्करापूरितं विद्वन् ! पात्रं तस्योपरि स्थितम् ॥५९॥

हे विद्वन् ! जल से परिपूर्ण एक कलश लाकर उसके ऊपर शक्कर से भरा एक सिकोरा रखे ॥ ५९ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूजाकाले प्रयत्नेन दातव्यं च द्विजन्मने ॥६०½॥

यत्न पूर्वक पूजन समय ब्राह्मण को दान देवे ॥ ६०½ ॥

तत्र मंत्रः—

मसीभाजनसंयुक्तश्चरसि त्वं महीतले ।

लेखिनी-कटिनी-हस्त चित्रगुप्त ! नमोऽस्तु ते ॥६१॥

पूजन का मन्त्र यह है कि दावात कलम और खिल्ली हाथ में लेकर पृथ्वी पर घूमने वाले, हे चित्रगुप्त ! आपको नमस्कार है ॥६१॥

चित्रगुप्त ! नमस्तुभ्यं लेखकाक्षरदायकम् ।

कायस्थजातिमासाद्य चित्रगुप्त ! नमोऽस्तु ते ॥६२॥

हे चित्रगुप्त ! कायस्थ जाति को प्राप्त लेखकों को अक्षर देने वाले आपको बार बार नमस्कार है ॥ ६२ ॥

येषां त्वया लेखनस्य जीविका येन निर्मिता ।

तेषां च पालको यस्मात्ततः शान्तिं प्रयच्छ मे ॥६३॥

लिखने की जीविका बनाकर जिनका आप पालन करते हैं इस लिये मुझे शान्ति दीजिए ॥ ६३ ॥

एभिर्मन्त्रैस्तु राजेन्द्र ! चित्रगुप्तस्य पूजनम् ।

सङ्कल्पपूर्वकं कुर्यात् कुरुवंशविवर्धन ! ॥६४॥

हे राजेन्द्र ! इन पूर्वोक्त मन्त्रों से सङ्कल्प पूर्वक हे कुरुवंश के बढ़ाने वाले भीष्म ! चित्रगुप्त का पूजन करना चाहिए ॥ ६४ ॥

एवं सम्पूज्य विधिवत् सौदासो भक्तिभावतः ।

अचिरेणैव कालेन राज्यं कृत्वा मृतो नृपः ॥६५॥

इस भाँति सौदास राजा भक्तिभाव से पूजन करके निज राज्य को करते हुए वह थोड़े ही काल के बाद मृत्यु को प्राप्त हुआ ॥ ६५ ॥

नीतोऽसौ यमदूतस्तु यमलोकं भयानकम् ।

चित्रगुप्तं तदाऽपृच्छद्यमराजश्च भारत ! ॥६६॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हे भारत ! उसी क्षण यमदूत उस राजा को भयानक यमलोक में ले गए। तब चित्रगुप्त से यमराज ने पूछा—॥ ६६ ॥

धर्मराजोवाच—

सौदासोऽयं दुराचारः पापकर्मरतः सदा।
अनेन स्वप्रजाभ्यश्च पापं कारितवांस्तथा ॥६७॥

धर्मराज बोले—यह दुराचारी पापकर्म में रत, सौदास राजा है जिसने अपनी प्रजा से पाप करवाया है ॥ ६७ ॥

पृष्टोऽसौ धर्मराजेन धर्माऽधर्मविशारदः।
धर्मराजं तदा प्राह चित्रगुप्तो महामतिः ॥६८॥
विपाकं कर्मजं ज्ञात्वा तं प्रहस्य शुभं वचः ॥६९½॥

जब इस भाँति धर्मराज ने पूछा तो धर्माधर्म के जानने वाले महामति चित्रगुप्त जी हँसकर उस राजा के कर्म विपाकयुक्त शुभ वचन बोले—॥६८–६९½॥

पापकर्मण्ययं राजा ख्यातो यद्यपि भूतले।
त्वत्प्रसादादहं सौरे ! पूज्योऽहं वसुधातले ॥७०॥

हे सौरे ! सूर्य–पुत्र ! यह राजा यद्यपि पापकर्म करने वाला पृथ्वी में प्रसिद्ध है। और मैं आपकी कृपा से पृथ्वी में पूज्य हूँ ॥ ७० ॥

त्वया दत्तवरः स्वामिन् ! शिवं भूयान्नमोऽस्तु ते।
भवान् जानात्विदं देव ! राजा पापोऽस्ति मे मतिः ॥७१॥

हे स्वामिन् ! आपही ने यह वर दिया है। आपका सदैव कल्याण हो। आपको नमस्कार है। हे देव ! आप भली भाँति जानते हैं और मेरी भी सम्मति है कि यह राजा पापी है ॥ ७१ ॥

पूजां चकार राजाऽसौ भक्तिभावेन मामकीम्।
अतस्तुष्टोऽस्मि हे देव ! यातु विष्णुपदं नृपः ॥७२॥

तो भी राजा ने भक्तिभावयुक्त मेरी पूजा की है। इससे मैं इस पर प्रसन्न हूँ। हे देव ! इस कारण यह राजा वैकुण्ठ लोक को जाय ॥ ७२ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यमेनाऽऽज्ञापितो राजा वैष्णवं पदमाविशत् ॥७३॥

तब यम ने राजा को वैकुण्ठ जाने की आज्ञा दी और वह वैकुण्ठ चला गया ॥ ७३ ॥

पुलस्त्य उवाच—

ये चाऽन्ये पूजयिष्यन्ति चित्रगुप्तं महीतले।
कायस्था वाऽघनिर्मुक्ता यास्यन्ति परमां गतिम् ॥७४॥

श्री पुलस्त्य जी बोले—जो कोई दूसरा पुरुष या कायस्थ चित्रगुप्त की पूजा करेगा वह पाप से छूट कर परमगति को पावेगा ॥ ७४ ॥

तस्मात्त्वमपि गाङ्गेय! पूजां कुरु विधानतः।
राजेन्द्र! दुर्लभं लोकं कृत्वा पूजामवाप्स्यसि ॥७५॥

इस कारण हे गांगेय! तुम भी चित्रगुप्त की विधियुक्त पूजा करो। जिस पूजा के करने से हे राजन्! दुर्लभ लोक को भी प्राप्त करोगे ॥ ७५ ॥

मुनेर्वचनमाकर्ण्य भीष्मः प्रहृतमानसः।
चकार पूजनं तत्र चित्रगुप्तस्य भक्तितः ॥७६॥

यह मुनि के वचन को सुन कर भक्ति युक्त मन से चित्रगुप्त की पूजा भीष्म ने की ॥७६॥

कार्तिके शुक्लपक्षस्य द्वितीयां च भारत!।
यमुनाया गृहे यस्मात् यमेन भोजनं कृतम् ॥७७॥

कार्तिक शुक्लपक्ष द्वितीया को निज भगिनी यमुना के घर यमराज ने भोजन किया ॥ ७७ ॥

अतो 'यमद्वितीये'ति लोके संज्ञां जगाम ह।
वरं दत्तं भगिन्या तु भ्रात्रे चाऽऽयुर्विवर्द्धनम् ॥७८॥

इस कारण लोक में इसका 'यमद्वितीया' नाम हुआ। और आयु को बढ़ाने वाला वर यमुना ने यमराज को दिया ॥ ७८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतो भगिनीहस्तेन तिथावस्यां च भोजनम्।
धनं यशश्चैवायुष्यं वर्द्धते कामसाधनम् ॥७९॥

इस से इस तिथि में बहन के हाथ से भोजन करने से धन, यश, आयुष्य भली भाँति बढ़ते हैं ॥ ७९ ॥

स्वशक्त्या चैव दातव्यं भगिन्येव विधानतः।
काले तत्रैव सम्पूज्य चित्रगुप्तं च लेखकः ॥८०॥
चित्रैश्च रक्तपुष्पैश्च रक्तचन्दनमिश्रितैः।
कृष्णोन्मत्तकपुष्पैश्च शमीपत्रैर्विशेषतः ॥८१॥
नैवेद्यैश्चैव दातव्यो मोदकं गुडमिश्रितम् ॥८२½॥

इस तिथि में स्वशक्ति के अनुसार भगिनी को दक्षिणा देवे और कायस्थ लोग बहिन के घर में चित्रगुप्त का पूजन ॥८०॥ चित्र विचित्र वर्ण के पुष्पों से, रक्त चन्दन, काले धतूर के पुष्प, व शमी के पत्ते से पूजन करके ॥ ८१ ॥ गुड मिश्रित लड्डू का नैवेद्य लगावें ॥ ८२½ ॥

पूजामन्त्र—

शान्तिदः प्रलयं चैव भोगाऽभोगाकृताऽकृते।
लेखकानां सदा श्रीदश्चित्रगुप्त! नमोऽस्तु ते ॥८३॥

पूजन का मंत्र यह है। भोग और अभोग, किया हुआ न किया हुआ, जो प्रलय है उस समय आप सुख देनेवाले हे चित्रगुप्त! आपको नमस्कार है ॥८३॥

श्रिया सह समुत्पन्नः समुद्रमथने कृते।
चित्रगुप्त! महाबाहो! मामायुर्वरदो भव ॥८४॥

समुद्र मंथन समय लक्ष्मी के साथ उत्पन्न होनेवाले हे चित्रगुप्त! हे महाबाहो! मेरे आयुष्य को बढ़ाओ ॥ ८४ ॥

चित्रगुप्तस्तु सन्तुष्टो भीष्माय प्रददेवरम्।
मत्प्रसादान्महाबाहो! मृत्युस्ते न भविष्यति ॥८५॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इस भाँति पूजन करने पर प्रसन्न होकर भीष्म को श्री चित्रगुप्त ने यह वर दिया कि हे महाबाहो ! मेरे प्रसाद से तुम्हारी मृत्यु न होगी ॥ ८५ ॥

स्मरिष्यसि यदा मृत्युं तदा मृत्युर्भविष्यति ।
इति तस्मै वरं दत्वा चित्रगुप्तो दिवं ययौ ॥८६॥

जिस समय तुम मृत्यु को स्मरण करोगे उस समय तुम्हारी मृत्यु होगी। यह वर देकर चित्रगुप्त स्वर्ग को चले गये ॥ ८६ ॥

अनेन विधिना यस्तु चित्रगुप्तस्य पूजनम् ।
करिष्यति महाप्राज्ञस्तस्य पूजाफलं शृणु ॥८७॥

जो बुद्धिमान् पुरुष इस विधि से श्रीचित्रगुप्त की पूजा करेंगे उसका फल सुनो ॥ ८७ ॥

इहैव विपुलान् भोगान् भुक्त्वा चैव मनोहरान् ।
अव्ययं वैष्णवं लोकं नरो याति न संशयः ॥८८॥

इस लोक में अनेक प्रकार के बड़े २ सुख भोग कर के मनुष्य अनाशवान् विष्णुलोक को निस्सन्देह जायँगे ॥ ८८ ॥

चित्रगुप्तकथां दिव्यां कायस्थोत्पत्तिकारिणीम् ।
भक्तियुक्तेन मनसा ये शृण्वन्ति नरोत्तमाः ॥८९॥
दीर्घायुषो भविष्यन्ति सर्वव्याधिविवर्जिताः ।
मृतो विष्णुपदं यान्ति यत्र यान्ति तपोधनाः ॥९०॥

कायस्थों की उत्पत्ति के कारण श्रीचित्रगुप्त की कथा को जो श्रेष्ठ भक्तियुक्त मन से सुनेंगे ॥ ८७ ॥ वे पुरुष समस्त व्याधियों से छूट कर दीर्घायु होंगे और अन्त में जहाँ तपस्वी लोग जाते हैं ऐसे विष्णुलोकको निस्सन्देह जाँयगे ॥८९–९०॥

इति श्रीपद्मपुराणान्तर्गते उत्तरखण्डे चित्रगुप्त-यमद्वितीयाकथा समाप्ता ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आरती—

शातिन्दः प्रलयं चैव भोगाऽभोग-कृताऽकृते ।
लेखकानां सदा श्रीदश्चित्रगुप्त ! नमोऽस्तु ते ॥ १ ॥
श्रिया सह समुत्पन्नः समुद्रमथने कृते ।
चित्रगुप्त ! महाबाहो ! मामायुर्वरदो भव ॥ २ ॥
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतीषि आर्तिक्यं प्रतिगृह्यताम् ॥ ३ ॥
कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥ ४ ॥

प्रार्थना—

नमस्ते चित्रगुप्ताय संसारभयहारिणे ।
जगतां मूलभूताय प्राणिनां शान्तिकारिणे ॥ १ ॥
येषां लेखनमात्रेण वृत्तिः क्वापि विनिर्मिता ।
तेषां त्वं पालको नित्यमतः शान्तिं प्रयच्छ मे ॥ २ ॥
चित्रगुप्तजनानन्द ! भूतानां पतये नमः ।
सर्वेषां मूलभूतस्त्वं त्राहि मां यज्ञकारक ! ॥ ३ ॥
गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ।
आगता सुखसम्पत्तिः पुण्याच्च तव दर्शनात् ॥ ४ ॥
रक्ष रक्ष महाराज ! रक्ष त्रैलोक्यरक्षक ! ।
भक्तानामभयं कर्त्ता त्राता भव भवार्णवात् ॥ ५ ॥
पूजा फलसुकार्याद्यैः सुवृत्तं यन्मया चितम् ।
तत्सर्वं फलदं मेऽस्तु भुक्ति-मुक्त्यथ देहि मे ॥ ६ ॥

श्रीचित्रगुप्ताय नमः, प्रार्थनां समर्पयामि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षमापन—

आवाहनं न जानामि न जानामि तवाऽर्चनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ! ॥ १ ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ! ॥ २ ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ! ।
यत्पूजितं मया देव ! परिपूर्णं तदस्तु मे ॥ ३ ॥
यदक्षरं पदभ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यतां देव ! प्रसीद परमेश्वर ! ॥ ४ ॥

अर्पण—

अनेन आवाहना-ऽऽसन-पाद्या ऽर्घ्याऽऽचमनीय-स्नान-वस्त्रोपवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्य-ताम्बूल-दक्षिणा-प्रदक्षिणा-मन्त्र-पुष्परूपैः षोडशोपचारैः, अन्योपचारैश्च यथाज्ञानेन यथामिलितोपचारद्रव्यैः यथाशक्तैः कृतेन पूजना-ख्यकर्मणा श्रीचित्रगुप्तदेवता प्रीयन्तां न मम । ॐ श्रीचित्रगुप्तार्पणमस्तु ॥

विसर्जन—

गच्छन्तु च सुरश्रेष्ठाः ! स्वस्थानं परमेश्वराः ! ।
यजमानहितार्थाय पुनरागमनाय च ॥ १ ॥
यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकामस्य सिद्ध्यर्थं पुनरागमनाय च ॥ २ ॥

आशीर्वादमन्त्र—

अक्षतान् विप्रहस्ताच्तु नित्यं गृह्णन्ति ये नराः ।
चत्वारि तेषां वर्द्धन्ते आयुः कीर्तिर्यशो बलम् ॥ १ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ २ ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ ३ ॥
श्रीचित्रगुप्तदेवता वरदो भव।

[यजमान बोले] तथाऽस्तु ॥

इसके पश्चात् यजमान कागज पर कुछ शुभ वाक्य लिखे।

इति श्रीज्ञानचन्दसम्पादितः-श्रीचित्रगुप्तयमद्वितीयाकथासहितः
श्रीचित्रगुप्तपूजनविधिः समाप्तः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.